सुरेन्द्रचन्द्रत्रिपाठीः
विद्यावारिधिच्छात्रः
श्रीश्रीविश्वविद्यालयः
विद्याधरपुरम्, कटकम् ।
Surendra Chandra Tripathy,
Qualifications:-M.Tech. and M.A. (Sanskrit),
Currently Pursuing PhD in Sri Sri University,
Bidyadharpur, Cuttack, Odisha.

<u>शीर्षकम् - शारदालिपीनां रचितानां पाण्डुलिपीनाम् अध्ययनम् ।</u>

काश्मीरप्रान्ते, तिब्बत्-क्षेत्रे, सिक्किम् प्रदेशे, नेपालदेशे अपि च सर्वतोपरि बौद्धपरम्परायां तन्त्रविद्या बहुप्रचलिता । तत्रोपलब्धानां गूढरहस्योद्धाटनं मम शोधकार्यस्य मूलाशयः । प्राक्तनानां ग्रन्थानां अध्ययनं अस्य शोधकार्यस्य अविच्छिन्नाङ्गं वर्तते । काश्मीराञ्चले मूलभाषा संस्कृत-एव आसीत् । परन्तु तत्र पण्डिताः शारदालिपिं व्यवहृत्य स्वस्वरचनाः अकुर्वन् । राजनीतिकपरिवर्तनकारणात् अयं लिपिः विलुप्तः भवति । संस्कृतस्य स्थानं उर्द्दु-पार्शी-आरवीय-भाषाः अलंकुर्वन्ति । काश्मीर-शैवपरम्परायाः अनुध्यानार्थं शारदालिपेः शिक्षणं अत्यावश्यकं भवति । परम्परा इयं तन्त्रमूला । तन्त्रनाममात्रेण साधारणजनाः भ्रूकुञ्चनं कुर्वन्ति । एतत् न सम्यक् । प्राक्-काले प्रायोगिकविद्यायाः नामान्तरं तन्त्रमासीत् । तत्र रुद्रायामलतन्त्रमाधृत्य विरचितस्य विज्ञानभैरवग्रन्थस्य गभीरानुध्यानं, तस्य प्रयोगं, प्रयोगान्तरोपलब्धप्रतिक्रियायां वैज्ञानिकविश्लेषणं च मम शोधपत्रस्य आशयः ।

अत्राहं तत्सम्बद्धोपस्थापनं न करोमि । शोधसम्बद्धग्रन्थानां पठनावसरे केषां-चिद् भिन्नग्रन्थानाम् अध्ययनम् अपि कृतं मया । तेषु मातालल्लेश्वरीकृतानि रचनानि अन्यतमानि । काश्मीरपण्डिताः लल्लेश्वर्याः नाम अतीव आदरेण अनुवदन्ति । काश्मीरप्रान्ते प्रतिगृहे सा अद्वैतवादिनी लल्लेश्वरी इति नाम्नि परिचिता । वैदिकरचनानां, गीता-श्रीमद्भागवत्-आदिग्रन्थानां च प्रतिफलनं तस्याः वाक्-मध्ये सर्वत्र परिलक्ष्यन्ते ।

किन्तु बहुनि भाषागत-वैचित्र्याणि सन्ति तेषु पाण्डुलिपिषु । तत्रोपलब्धानि बहुनि वाक्यानि पाणिनीयव्याकरणम् अनस्वीकुर्वन्ति । तेषां अनुशीलनं तात्कालीनसंस्कृतभाषायाः व्यावहारिक उत्कर्षतां प्रदर्शयति ।

यथा पूर्वेऽपि उक्तं मया - काश्मीरक्षेत्रे संस्कृतरचनार्थं शारदालिप्याः प्रचलनम् अभवत् । इयं लिपि बहुप्राचीना । अस्याः सामञ्जस्याः ब्राह्म्या लिप्या सह परिदृश्यते । उत्तरभारते प्रचलिता गुरुमुखी अस्याः उद्भूता । अस्यां लिप्यामेव वहुप्रसिद्धग्रन्थानां पाण्डुलिप्यः उपलभ्यन्ते । आचार्याभिनवगुप्तः, उत्पलदेवः, लक्ष्मणगुप्तः, शम्भुनाथः, वसुगुप्तः, क्षेमराजः-आदयः शारदालिपीं व्यवहृत्य स्वरचनाः कालजयी कृतवन्तः । अद्याऽपि वहुशः ग्रन्थाः पाण्डुलिप्याकारैः धूलिधूसरिताः अन्धकारगृहे आलोकवर्त्तिकां अपेक्षन्ते । तन्मध्ये मातालल्लेश्वरीकृतं लल्लावाक् अन्यतमः । आत्मोन्नतिकल्पे लिखितानि एतानि ग्रन्थानि मुलतः प्राचीनकाश्मीरभाषायां लिपिबद्धानि प्राप्यन्ते । एतेषां सुललितपदरचना, आध्यात्मिकभावस्य ऋद्धिः, साधारणजनोचितभाषाशैली अपि च छन्दबद्धोपस्थापनम् अत्यन्तं हृदयस्पर्शी । पद्यानां संस्कृतव्याख्या अपि शारदालिप्यां कृता तत्र। मातालल्लेश्वरीकृताः बहूनि ग्रन्थानि प्रकाशितानि । किन्तु अद्यावधि कतिपयग्रन्थानि अप्रकाशितानि । एतादृशं पाण्डुतिपिमुलकं ग्रन्थैकं अन्तर्जालमध्ये अस्ति । तस्याध्ययनात् तात्कालिकसंस्कृतसम्बद्धज्ञानमुपजायते । यानि यानि व्यतिक्रमाणि मया दृष्टानि, तानि एकीकृत्य अत्र मया दीयते ।

पाण्डुलिपीनां सुबोधाय मया संख्या व्यवहृता । तस्याः अर्थाः एतत्प्रकारेण बोधगम्याः यथा -

०२६१४ - अर्थात् पृष्ठसंख्या ०२६, पङ्क्तिसंख्या - १४ ।
मुलपाण्डुलिप्याः प्रतिकृतिः मया संरक्षिता ।

(क)व्यतिक्रमाणि - न्म स्थाने त्म

मूलपाणिनीयसूत्राणि -

## 8.4.45 -यरोऽनुनासिकेऽनुनासिको वा
## 8.2.39 - झलां जशोऽन्ते
## प्रत्यये भाषायां नित्यम् ॥(वार्तिक)

उदाहरणम् -
१) वाक् + मुखम्  = वाग् + मुखम् (८.२.३९) = वाङ्मुखम्, वाग्मुखम् (८.४.४५) । गकारस्य विकल्पेन ङकारादेशः ।
२) षट् + मुखम् = षण्मुखम्, षड्मुखम् (८.२.३९) । डकारस्य विकल्पेन णकारादेशः ।
३) एतत् + मुरारि = एतद् + मुरारि (८.२.३९) = एतन्मुरारि, एतद्मुरारि । दकारस्य विकल्पेन नकारादेशः ।
४) त्रिष्टुप् + नमति = त्रिष्टुम्नमति, त्रिष्टुब्नमति । बकारस्य विकल्पेन मकारादेशः ।

**व्यतिक्रमाणि - (पान्डुलिप्यां पुस्तके वा उपलब्धानि कतिपयोदाहरणानि)**

०२६१४ - दीन्तान् षड्भावान्साक्षिरूपी **यत्मूलप्रकृतिरुच्यते**
०३३०६ - **केचित्मायामधुरसमोहिता** ये लोकास्युः ॥ क-
०३९०६ - निर्मलं (ग्वाह् **चित्मस्य**) चिदात्मज्ञानस्वरूपं तुर्याप्रकाशा-
०५२०७ - चारभवति यदेव **तत्मोक्षश्चतत्वतः** ॥ जाग्रत्स्वप्नसुषुप्त्या-
०६००३ - रुषस्य ॥ सः पुरुषः (कं भुय) **किञ्चित्मात्राल्पका**-
०७६१२ - (पशु)**वत्मूढोभवेत्** ॥ स पुरुषः कथं कामक्रो-

१०००८ - (सोय् मन्त्रः) (उच्चारत)**त्मन्त्रः** ॥ (यो यो देहस्) यद्यद्देहाभिमाननामसन्ताप

१०६११ - ये ॥ यततामपि सिद्धानां **कश्चित्मां**

१०८१२ - श्च **यत्महाविघ्नोऽस्ति** तत्तद्विनिवर्तयेत्

१२८१३ - **तत्मृत्युं** यमत्रासहारकं (हर हर) हरस्यात्मदेवस्य

१३७०६ - रगतिर्भवति (गोम्भज्) यद्गुहरारेण **तत्मध्ये**

१६७१० - हमिति **स्यात्मङ्गलम्** (रूतोता) ॥ यत्त्वमङ्गल (क्रतो)

१८९०६ - रूपे स्व स्व रूपज्ञानरहिता **नात्मायत्मा**(या)-

१९८१२ - शक्यते ॥ (तेकुर्) ततस्तु **तत्महात्म्यं** सत्यं वैखरी

२०५०४ - त्यर्थः ॥ ननु **योगाभ्यासात्मनोमयं** वृत्तिं

(अत्र प्रथमपदस्य अन्तिमवर्णस्य स्थाने तृतीयस्य अथवा पञ्चमवर्णस्य आदेशः स्यात् ।

(ख) व्यतिक्रमाणि - न स्थाने ण

मूलपाणिनीयसूत्राणि -

## ८.४.१-रषाभ्यां नो णः समानपदे
## ८.४.२ - अट्कुप्वाङ्नुम्व्यवायेऽपि
## पदान्तस्य(८.४.३७) इति सूत्रात् पदान्तस्य नकारस्य णकार न भवेत् ।

व्यतिक्रमाणि -

००१०६ बान गलो ता ॥९॥ उथु रैन्या **अर्चण्**

०३२०५ - ॥ **इत्येवमात्मज्ञानार्चणेंनू** ( पिठ् इति )र्धताममृतत्वेन

०३९०३ - र्थेश्वरनाम्नि शिवस्वरूपे चित्प्रकाशाख्यामात्मानं (शिवपूजोन्)

**लिङ्गकारार्चणां**

०५८११ - प्राणेश्वरं **यागादिमर्चणां** कुर्वन्ति
०६००१ - फलस्तस्याऽस्ति ॥ **सर्वार्चणादि** तीर्थयज्ञदा-
०६४०१ - नः (गछान्) गच्छन्ति (प्रथूय् **तीर्थण्**) तीर्थस्नानार्थं दिशान्तरे (**फैराण्**) चरन्ति प-
०७२१२ - (अर्च)**णार्थमित्याशङ्क्य** ॥४१॥ (गगन् चूय् भू-
०७४०२ - **दात्मार्चणार्थार्घ्यदर्घ्यं** (अर्घ्यं) तन्निश्चयात्मका
०७४०९ - **कलपदार्थमर्चणार्थं** (लागेजि) वा द्रष्टान्तं किं (क्याह्) क-
०८९०९ - **तद्विमर्शणी** नामेचिच्छक्तिस्स्यादिति प्रव-
१२६१४ - (बजख्) (श)**ब्दान्कुर्वण्** ॥ ततः (कमे करे पुण्य्) को पुण्यकृतो कः (पाप्) पाप
१६३०५ - व **प्रतिमार्चणां** करोमितत्त्वतइत्यर्थः ॥ (पूज्)

(ग) व्यतिक्रमाणि - ण स्थाने न

१५३०३ - तानि **योगमार्गेन** निवृत्तिं कृतत्वादात्म-
१५४०७ - (योगमार्गे)**न** जपेन्नित्यः ॥ न तु गुरुप्रसादं विना
२०८११ - (शून्यमार्गे) **न** भावाभावधारणाभिरहर्निशमधि-

(घ) व्यतिक्रमाणि - श स्थाने ष
००१०५ नाथ नाव पाना ॥७॥ शिव वाके **षिव** ॥८॥
००१०९  रो **केषवा**॥ १४॥ अनाहत् ख स्वरूप्

(ङ) व्यतिक्रमाणि शशि स्थाने शिश
०४३०४ - र्ध्निस्थितः स्वबोधामृतरसं **शिशकलाख्यं** पर-

(च) व्यतिक्रमाणि शिशिर स्थाने शशिर
०२२०६ - स्य प्रयाति रशि **शशिरकाले** च यथा॥ ततः प-
(छ) व्यतिक्रमाणि सृष्टि स्थाने स्त्रष्टि
०६००७ - स्त्रष्टिकर्ता ब्रह्मा स्वायुरादि कालपरि-

०७१०७ - मृतमादिमध्यन्तवर्जितात् ॥ **स्त्रष्टि**-
१२३०७ - पुनः पुनरेवानन्त**स्त्रष्टि**स्थितिसंहार-
०८५०४ - लदर्शः॥ अथ बहुप्रकार**स्त्रष्टिषु** ब-
१८९०१ - ह्माविष्णुरुद्ररूपे **स्त्रष्टि**स्थितिसंहारका-

<u>(घ) व्यतिक्रमाणि - पदान्तस्य मकारस्य अनुस्वारः न भवेत् ।</u>

सूत्राणि -

मोऽनुस्वारः (८.३.२३)

नश्चापदान्तस्य झलि (८.३.२४)

अनुस्वारस्य ययि परसवर्णः (८.४.५८)

<u>व्यतिक्रमाणि -</u>

००२०१ सहस शं **दं** ॥२९॥ लोभ मारोण् सहस
०३६०८ - मूढवत्स्व**यं** ॥ महान्तरेण चक्रेण प्रवृति-
०३८१५ - षुप्तपदेकरोति (राहु ग्रासोन्) विल**यं** ॥ पूर्णपञ्चदश्यां य
०५९१३ - नि**त्यं** ॥ अकारउकारमकारादि ब्रह्मावि-
०६०१४ - रणं (चितस् करि) करोति गुरुभक्तियुक्ताऽपि नि**त्यं** ॥
०६६१० - धूनां विनाशाय च दुष्कृ**तां** ॥ धर्मसंस्था-
०७६०८ - यते विपक्षभू**तं** ॥ तथा शिवनाम परमा-
०९११३ - **णं** ॥ ज्ञानवैराग्यसिद्ध्यर्थं गुरुपादोद-
१०६०२ - नां च बाह्याभ्यन्तरं नीरं यथा सम्पू**र्णं** ॥
१३००१ - प्रणष्टेषु यथाकाशमखण्डि**तं** ॥ त-
१३५०२ - भवति प्रयाति विल**यं** ॥ केन सत्तामा-
१३६१४ - **किं** ॥७०॥ ( हा हे हङ्क् नाद् जन्
१५२०१ - सक्ता**नां** ॥ एतन्ममतां कुर्वन्ति ते मम
१५३१० - रोषि **त्वं** ॥ स्यात्तद्भक्तिस्तद्योगस्तत्परं फ-
१६५१२ - विवहारधर्म्यंकथं भवेदुन्मत्तोप**मं** ॥ लो-
१९१०४ - ग्रे विषमिव परिणामेऽमृतोपमं ॥ तत्सु
१९४१५ - मि ति ) ॥ तस्मादद्वैतविमर्षं करोमि स**त्यं** ॥

२०००६ - वाः न भवन्ति प्राप्तिसङ्ग**मं** ॥ तस्मिन्समा-

उपसंहारः -

उल्लिखितैः उदाहरणैः एतत् प्रतीयते यत् -
(१) सम्भवतः ग्रन्थरचनासमये पाणिनीयव्याकरणात् भिन्नः कस्यापि व्याकरणशास्त्रस्य प्रचलनम् आसित् ।
(२) संस्कृतभाषा अपि लोकिककाश्मीरभाषया प्रभाविता आसीत् ।

ॐ शम् ।

Ref:- (1) https://archive.org/details/LalDyadWithSanskritTranslationSharadaRamShaivaAshram/page/n17/mode/2up

(2) https://photos.google.com/share/AF1QipM6kz2eiw8JqMfPC4A_tfglyG2trGamAAxKt4Rx2Oyv1b6_PR-a8PY5ehs6F8DnLg?key=dG90NzBmas1yWkdJYURnM2JWai1NVmF3NUI1LXV3

(3) https://en.wikipedia.org/wiki/Lalleshwari

(4) *Lalla-Vakyani*, Sir George Grierson and Dr. Lionel D. Barnett Litt. D. (R. A. S. monograph, Vol. XVII, London 1920).ISBN 1846647010.

Address for correspondence:

S C Tripathy
MIG-15, Anant Vihar, Phase-2,
Pokhariput, Bhubaneswar,
Odisha - 751020.